
अथ

गोदान पद्धति



प्रारम्भः ।

॥ श्रीगणेशाय नमः ॥

गोदान पद्धति प्रारम्भः।

अद्येहेत्यादि श्रुति स्मृति पुराणोक्त फल प्राप्ति कामनया गोदान कर्म कर्माहं करिष्ये ॥ अद्य कर्तव्य गोदानएभिश्चन्दनाक्षत पुंगी फल तांम्बूल द्रव्य वस्त्रालंकारै रभ्यर्च्य असुक शर्माणं ब्राह्मणम् एभिर्द्रव्याक्षत पुंगी फल गोदान गृहीत्वेन त्वा महं वृणे ॥ वृतोस्मीति प्रति वचनम् ॥ व्रतेन दीक्षा माप्नोति दिक्षयाप्नोति दाक्षिणा श्रद्धामाप्नोति श्रद्धया सत्य माप्यते ॥ ततो गोदान सामग्री संप्रोक्ष्य गांसवत्सां पूजतेत् गवामंगेषु तिष्ठन्ति भुवनानि चतुर्दश ॥ यस्मात् तस्माच्छिवंमेस्यादिह लोके वस्त्र च ॥ गोभ्यः आसनं पाद्यं अर्घ्यं आचमनं स्नानं प्रदापयेत् ॥ आच्छा-

दनं वस्त्रसंयुक्तं ... वस्त्र दानेन प्रीयतांपर-

मश्वरा ॥ गो आछाद्य वस्त्रेण ॥ गावोमेच अतः सन्तु गावोमे सन्तुपृ-
ष्ठतः गावोमें हृदय सन्तु गवां मध्ये वसाम्यहं ॥ इति अक्षतं समर्पयामि ॥
पंच गावो समुत्पन्ना मध्ये मानो महोदधौ ॥ तासां मध्येतु श्रेष्ठा तस्मै
धेन्वै नमो नमः ॥ इति गन्धादि पुजासमर्पयामि पूजितासि बसिष्ठत बि-
श्वामित्रेण धीमता ॥ सूरभी हरमे पापं यन्मया दुःकृतम् ॥ पुष्प माला च
स० ॥ नमो गोभ्यः श्रीमातिभ्यः सौरभेयीभ्य एवच ॥ नमो ब्रह्म सुता-
भ्यश्च पवित्राभ्यो नमो नमः ॥ सुरभीत्वं जगन्माता नित्यं विष्णु पदे
स्थिता ॥ मातर्गृहाण मद्दत्तं गोमातस्त्रातुकर्हसि ॥ इति नैवद्यम् स० ॥
धूपं दीपादिके दद्यात फलानि विविधानिच ॥ गृहाणार्घं यमा दत्तं देहिमे
वांछितं फलम् ॥ रूपं देहि जयंदेहि भाग्यंदेहि यशस्तु में ॥ पुत्रांदेहि
धनंदेहि सर्वा कामाश्चदेहिमे ॥ इति समस्त पूजन सामग्रीं स० ॥ ततो
अंग पूजा ॥ पृष्ठे ब्रह्मणे नमः गले विष्णुवे नमः ॥ मुखे रुद्राय नमः ॥ १

रोम कूपेषु सर्वेभ्यो महार्षिभ्यो नमो नमः ॥ पुच्छे सर्वे नागेभ्यो नमः
स्तनेषु चतुस्समुद्रेभ्यो नमः ॥ खुराग्रेऽष्ट कुल पर्वतेभ्यो नमः ॥ नेत्रयोः
शशि भास्कराभ्या नमः ॥ शृंगयोर्मध्ये सर्वतीर्थभ्यो नमः ॥ मूत्र स्थाने
गंगादि सर्वनदीभ्यां नमः ॥ गोमयं लक्ष्मैनमः ॥ कर्णयोऽश्विनाकुमारा-
भ्यां नमः ॥ जिव्हायां सरस्वत्यै नमः ॥ नासा पुटयोः खुमुखाय नमः ॥
उदरे पृथिव्यै नमः दक्षिण पार्श्वे कुबेराय नमः ॥ वामपार्श्वेवरुणाय नमः ॥
हुंकारे सर्व देवेभ्यो नमः ॥ इति अंग पूजा ॥ यानि कानि च पापानि
ब्रह्म हत्या समानि च । तानि तानि विनश्यन्ति प्रदक्षिणा पदे पदे ॥
इति प्रदक्षिणां ॥ अथ प्रार्थना पृष्टे ब्रह्मा गले विष्णु मुखे रुद्र प्रतिष्ठि-
ताः ॥ मध्ये देवगणाः सर्वे रोमकूपे महर्षयः ॥ नाग पुच्छे खुराग्रेषु ये
चाष्टौ कुलपर्वता मूत्रे गंगा दयो नद्याः नेत्रयोः शशि भास्करौ ॥ एत-
स्यायतनदेवा साधेनुर्वरदास्तुमे ॥ या लक्ष्मीः सर्व भूतानां या देवेष्व-

गो. सरस्वती ॥ धेनु रूपेण सा देवी मम पापंव्यपोहतु ॥ विष्णोर्वक्षसि या
२ लक्ष्मी स्वाहायांच विभावसौ ॥ चन्द्रार्क शक्र शक्तिर्या साधेनुर्वरदास्तुमे ॥
चतुर्मुखस्य या लक्ष्मी लक्ष्मीर्या धनदस्यच ॥ या लक्ष्मी लोक पालानां
साधेनुर्वरदास्तुमे ॥ या स्वधा पितृ मुख्यानां स्वाहायज्ञ भुजस्तथा ॥ सर्व
पापहरौ धेनु सामां शान्ति प्रयच्छमे ॥ ततो गौ पुच्छोदक तर्पणम् ॥
ब्रह्माद्या देवता सर्वे ऋषयों मुनयस्तथा ॥ असुरा यातु धानाश्च मात-
रश्चण्डिकास्तथा ॥ दिग्पाला लोक पालाश्च सर्वे ग्रेहाधि देवताः ॥ ते सर्वे
तृप्ति मा यान्तु गोपुच्छोदक तर्पणे ॥ विश्वेदेवास्तथा साध्यादित्याश्चैव
रुद्रगणा ॥ क्षेत्रपालोय पीठानि नदीं नद्यश्च सागरः ॥ पाताले नाग
कन्याश्च नागाश्चैव सपर्वपताः ॥ पिशाचा गुह्यकाः सिद्धा गन्धर्वाप्सर
रोक्षसाः ॥ पृथिव्या यश्च तेजश्च वायुराकाश मेवच ॥ दिवि मुख्यतं
रिक्षैश्चये च पाताल वासिनः॥ तेसर्वे तृप्तिमायान्तु गो पुच्छोदकतर्पणैः॥ २

क्षेत्रौषधि लता वृक्षा वनस्पत्याधि देवताः कपिलो शव नामाश्च तक्षको-ऽनन्त एवच ॥ अन्ये जलचरा जीवा असंख्या तास्वनेकसः ॥ सर्वाणि जन्तु राजानः पक्षिनः पशवस्तथा ॥ स्वेदजोद्भिज्जजीवाश्च अण्डजाश्चे जरायुजाः अन्येपि बनजा जीवाः दिवा निशि बिहारिणः ॥ अजा गो महिषी रूपाये चान्ये पशवस्तथा ॥ शान्तिदा शुभदास्तेस्तु गो पुच्छो-दक तर्पणैः ततः कण्ठ सुत्रो उदङ्मुखो मुत्वा ॥ मरीचि आत्रि अङ्गिरा पुलस्त्य पुलः क्रतुः ॥ सनकः सनन्दनः श्चैव सनातन ततोयकः कपि-लश्चाऽसुरिश्चैव वोढु पंच शिखस्तथा ॥ तेसर्वे तृप्ति मायान्तु गो पूच्छो-दक तर्पणैः ततः सव्येन पुर्वाभिमुखाः मरीचि अत्रि अंगिरश्चवै वपुल-स्त्यः पुलहस्तथा ॥ वशिष्ठ नारदश्चैव भृगुश्चैव प्रचेतसाः ॥ तेसर्वे तृप्ति-माया० ॥ ततः अपसव्येन मोटक तिलजलान्यांदाय दक्षिणाभिमुखः ॥ [illegible] पायमस्तथा यमाय धर्मराजाय मृत्यवे

योनिकाय च ॥ अवसन्नाय कालाय सर्वभूतक्षयाय च ॥ औदुम्बराय:
गो. दध्नाय नीलाय परमेष्ठिने ॥ वृकोदराय चित्राय चित्रगुप्तायवैनमः॥ ततः
३ गोत्रोच्चारणम् ॥ अमुक गोत्रा पिता अमुकशर्मा सपत्नीक अमुक स्वरूप इदं जलं तस्मैस्वधा ॥२॥ एवं पितामह प्रपितामहादीनामपि एवं मातामह प्रमातामह बृद्धप्रमातामहदीनामपि ॥ तर्पणं कर्त्तव्यम् ॥ पितृवंशेमृतायेव मातृबन्शे तथैवच गुरूश्वसुरबन्धूनांये कुलेषु व्यवस्थिता: ॥ विरूपायमगर्भाश्च जात्यंधापंगवस्तथा ॥ उछिन्नावांधवाये च लुप्तपिण्डोदकाक्रिया: ॥ तेसर्वे० ॥ आब्रह्मास्तम्भपर्यंतं येचान्येगोत्रिणस्तथा ॥ तेसर्वे ॥ आमगर्भमृतायेव ब्रह्मशापेनये मृता: ॥ संस्काररहतायेव रौरवादिषु गामिन: ॥ तेस० ॥ सर्पव्याघ्रहतायेच शृंङ्गिदौष्ट्रजलाग्निभि:॥ अपुत्रा अक्रियायेच अघोरा धर्म वर्जिता: ॥ तेस० ॥ आब्रह्मस्तंभपर्यंत देवर्षिपितृमानवा: ॥ तेस० ॥ तृप्यन्तुपितर: सर्वे मातृमातामहादय: ॥ ३

अतीतः कुलकोटीनां सप्तद्वीपनिवासिनां ॥ आब्रह्मभुवनाल्लोकः इद-
मस्तुतिलोदकम् ॥ तेस० ॥ येमेकलेलुप्तपिंडा पुत्रदाराविवर्जिता॥क्रिया
लोपगतायेच जात्यधा पुंगवस्तथा ॥ विरूपायामगर्भाश्च ज्ञाताऽज्ञाताः
कुलेमम ॥ तेस०॥ यत्रान्धबान्धवायेच वान्यजन्मनिबान्धवाः ॥तेस०॥
वृक्षत्वचगतायेच तृणगुल्मलतास्थिताः ॥ तेस० ॥ यातना सुचघोरेषु
जातीषु विविधासुच ॥ तेस० ॥ नरकेषुच घोरेषु पतितायेकुकर्मणा ॥
तेस० ॥ देवत्वं मनुषत्वंच तिर्यक्प्रेतपिशाचकम् ॥ तेस० ॥ कृमिकीट-
गतायेच पतितायेस्वकर्मणा ॥ वृक्षत्वंचगतायेच येतत्संसंगिणस्तथा ॥
तेस० ॥ अंण्डयोनिषुयेजाताः गोधाद्याः पापजंतवः ॥ लतायोनिगतायेच
स्त्रियोवापुरुषापिवा ॥ तेस०॥ भूतयोनिगतायेचपुद्गलत्वंगताश्चये ॥ प्रेत-
योनिगतायेचान्ययोनिश्चयेगताः ॥ तेस० ॥ तिर्यग्योनिगतायेचयामगर्भे-
पतन्तिये ॥ आसुरयानिमुत्पन्ना पिशाचत्वञ्चसमगता ॥ तेस० ॥ यातु-

धान समुत्पन्नालक्षयोनिमुपागताः ॥ गृद्धयोनिगतायेचनाग योनिगता-
श्चये ॥ तेस० ॥ जलजत्वंसमुत्पन्ना सर्पयोनिषुयेगता ॥ देवयोनिषुये-
यजाताः पितृयोनिसुयेगताः ॥ तेस० ॥ ऋषियोनिषुयेजाताः ब्रह्मयो-
निषुयेगताः ॥ अग्नियोनिसुयेजाताः विष्णुयोनिसुयास्थिताः ॥ तेस० ॥
जरायजाश्चयेजाताः पश्वादिसुचयेगताः ॥ ताभिश्चनरकंयाता अन्यत्वञ्च
समागताः ॥ तेस० ॥ महानिरय संजाता पापिष्ठाः कर्मकारिणः ॥ शल-
भेनरकेजाता कटकेश्च त्रिशाणताः ॥ तेस० ॥ रौरवेनरके जाता अन्न-
पानविवर्जिताः ॥ तेस० ॥ ॐ तत्सत अद्यश्रीब्रह्मणोह्नि द्वितीयप्रहरार्द्धे
प्रथमवर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे प्रथममुहूर्ते सप्तमवैवस्वतमन्व-
तरे अष्टाविंशतिमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखंडे आर्या-
वर्तान्तरगते ब्रह्मावर्तैकदेशे अविमुक्तवाराणसीक्षेत्रे यथानामसंवत्सरे अमु-
कायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमु- ४

कनक्षत्रे अमुकयोगे अमुककरणे अस्मिन्पुण्यकाले ममइह जन्मनिजन्मा-
न्तरे अज्ञानवसमक्कृति वियोगाच्चगुणत्रय कारणामनोवाक् कायकल्पित
त्रिशतकृतमम समस्त पाप संघट्ट परदारा ब्रह्महा मद्यपानस्यैव गुरूतल्प-
गइधनार्थद्रुमछेदस्त्रीहिं सौषधि जीवनं सावित्रिविधवा दासिवेश्याभिगमनं
रहस्यपातको पापक अगम्यागमन अभक्षाभक्ष अलेह्यालेह्य अचोष्या-
चोष्य अभोज्याभोज्य मस्पृष्टास्पृष्ट अनिक्षाभाजन पंक्ति भेद वेद विक्रय
हयविक्रय शुद्रसंसर्ग देवताहरण फलादिहरण आयुरारोग्य धनधान्य
संप्राप्ति पूर्वक इमांग रुद्र देवतां वस्त्रद्वयस्वर्णश्रृंगी रौप्यखुरीरत्नपुच्छीं
ताम्रपृष्टीं घंण्टाचामरसंयुता कांस्यदोहनी विष्णो प्रीत्यर्थ अमुकगोत्राय
अमुक शर्मणे ब्राह्मणायतुभ्यमहं सम्पदे । स्वस्तीति प्रतिबचनम् । ततः
कृतत्तगोदान प्रतिष्ठ सिद्ध्यर्थं सुवर्ण दक्षिणां दद्यत् । इति प्रदाक्षिणांकृत्वा
गांनात्वा ब्राह्मणनत्वा भूयसींदत्वा ॥ इति गोदान ॥ विधी समाप्त ॥

॥ अथ गोदान प्रशंसा ॥

गावो पश्याम्यहं नित्यंगावः पश्यतुमांसदा ॥ गावो-
स्माकं वयंशान्तियतोगावोस्ततोवयम् ॥ १ ॥ गावःपवित्रपरमं
गावोमंगलमुत्तमम् ॥ गावः स्वर्गस्य सोपानः गावोधन्या-
सनातनः ॥ २ ॥ घृतक्षीरप्रदागो [illegible]यान्याघृताद्भवाः ॥
घृतोंनद्योघृतवासाताामेसन्तु सदागृहे ॥ ३ ॥

पताः-पंडित शिवरामशर्म्मा बुकसेलर,

अन्नपूर्णा मन्दिर काशी ।

श्रीगणेशायनमः ॥ भजगोविन्दंभजगोविन्दंभजगोविंद मूढम-
ते ॥ प्राप्तेसन्निहितेमरणेन हिनहिरक्षतिडुकृञ्करणे ॥ १ ॥ भज० ॥
बालस्तावत्क्रीडास क्तस्तरुणस्तावत्तरुणीरक्तः । वृध्दस्तावच्चिन्तामग्नः
परेब्रह्मणिकोपिनलग्नः ॥ २ ॥ भ० ॥ अंगंगलितंपलितंमुंडंदशनविहीन-
नंजातंतुण्डं ॥ वृध्दोयातिगृहीत्वादंडं तदपिन मुंचत्याशापिंडं ॥ ३ ॥
भ० ॥ पुनरपिजननं पुनरपि मरणं पुनरपि जननी जठरेशयनम ॥
इहसंसारेखलु दुस्तारे कृपयापारेपाहिमुरारे ॥ ४ ॥ भ० ॥ दिनमपि रज-
नीसायंप्रातः शिशिरवसन्तौ पुनरा यातौ । कालः क्रीडतिगच्छत्या यु-
स्तदपिनमुंचत्याशावायुः ॥५॥ भ० ॥ जटिलोमुंडी लुंचितकेशः काशायां-
बरबहुधृतवेषः ॥ पश्यन्नपि नचपश्यति लोक उदरनिमित्तं बहुकृतशोकः
॥ ६ ॥ भ० ॥ वयसिगतेकः कामविकारः शुष्केनीरेकः कासारः क्षीण
वित्तेकः परिवारोज्ञातेतत्त्वेकः संसारः ॥ ७ ॥ भ० ॥ अग्रेवह्निः पृष्ठे
भानू रात्रौचुबुकसमर्पितजानु ॥ करतल भिक्षातरुतलवासस्तदपि नमुंच-
चत्याशापाशः ॥ ८ ॥ भ० ॥ यावद्वित्तो पार्जनसक्तस्तावन्निजपरिवा-

च० रोरक्त पश्चाज्जजरभूतेदेहवार्ता कोपिनपृच्छतिगेहे ॥ ९ ॥ भ० ॥ रथ्या-
१ कर्पट विरचितकन्थः पुण्यापुण्यविवर्जितपंथः ॥ नत्वंनाहंनायंलोकस्तद-
पिकिमर्थंक्रियतेशोकः ॥ १० ॥ भ० ॥ नारीस्तनभरजघननिवेशं दृष्टा-
वमायामोहावेशम् ॥ एतन्मांसवसादिविकारंमन सिविचारयबारम्बारम्
॥ ११ ॥ भ० ॥ गेयंगीतानामसहस्रंध्येयं श्रीपतिरूपमजस्रं ॥ नेयंसज्ज-
ननिकटेचित्तं देयंदीनजनाय चवित्तम् ॥ १२ ॥ भ० ॥ भगवद्गीता
किंचिदधीता गंगाजल लवकणिकापीता येनाकारिमुरारेरर्चा तस्य यमः
किंकुरुतेचर्चा ॥ १३ ॥ भ० ॥ कोहंकस्त्वंकुतआयातः कामेजननीकोमे-
तातः ॥ इतिपरिभावयसर्वमसारं सर्वंत्यक्त्वास्वप्नविचारं ॥ १४ ॥ भ० ॥
कांतेकांताकस्ते पुत्रः संसारोऽयमतीवविचित्रः कस्यत्वंकः कुतआयातस्त-
त्त्वं चिंतयमनासिभ्रातः ॥ १५ ॥ भ० ॥ सुरतटिनीतरुमूलनिवासः श-
य्याभूतलमजिनबासः ॥ सर्वपरिग्रहभोगत्यागः कस्यसुखंन करोतिविरागः
॥ १६ ॥ भजगोविन्दं भजगोविन्दं भजगोविन्दं मूढमते ॥ १

इति श्रीमच्छंकराचार्यविरचितं चर्पटपंजरिका स्तोत्रं समाप्तं ॥


॥ अथ देव्यपराधक्षमापनस्तोत्र प्रारम्भ ॥

नमन्त्रंनोयन्त्रं तदपिचन जाने स्तुति महो नचाह्वानं ध्यानं तद-पिचनजानेस्तुतिकथाः ॥ नजानेमुद्रास्तेतदपि चनजानेविलपनं परंजाने-मातस्त्वदनुसरणंक्लेशहरणम् ॥१॥ विधेरज्ञानेनद्रविणविरहे णाल सतया विधेया शक्यत्वात्तव चरणयोर्याच्युतिरभूत् ॥ तदेतत्क्षन्तव्यंजन निसक-लोद्धारिणिशिवे कुपुत्रो जायते क्वचिदपिकुमाता न भवति ॥२॥ पृथि-व्यांपुत्रास्ते जननिबहवः सन्तिसरलाः परंतेषां मध्येविरलतरलोऽहं तवसु-तः ॥ मदीयोऽयंत्यागः समुचितमिदंनोतव शिवेकुपुत्रोजायेत क्वचिदपि-कुमातान भवति ॥३॥ जगन्मातर्मातस्तव चरण सेवा नरचिता नवाद-त्तंदेविद्रविण मपिभूयस्तवमया ॥ तथापित्वंस्नेहं मयि निरुपमंयत् प्रकु-रुषे कुपुत्रोजायेतक्वचिदपिकुमातान भवति ॥४॥ परित्यक्त्वादेवान् वि-

विध विधि सेवा कुलतया मयापञ्चाशीते रधिक मपनीतेतु वयसि ॥ इदानींचेन्मातस्तव यदि कृपानापिभविता निरालम्बोलम्बोदरजननि कं यामि शरणम् ॥५॥ श्वपाकोजल्पाकोभवति मधुपाकोपमगिरा निरातङ्को रङ्का विहरतिचिरं कोटि कनकैः ॥ तवापर्णेकर्णेविशति मनुवर्णे फलमिदं जनः कोजानीते जननि जपनीयं जपविधौ ॥६॥ चिताभस्मालेपोगरलशमनंदिक्पटधरो जटाधारी कण्ठे भुजगपतिहारीपशुपतिः ॥ कपाली भूतेशोभजाति जगदीशकपदवीं भवानि त्वत्पाणि ग्रहण परि पाटीफल मिदम् ॥७॥ नमोक्षस्याकाङ्क्षानचविभववाञ्छाऽपिच नमे नविज्ञाना पेक्षाशशिमुखिसुखेच्छापिनपुनः ॥ अतस्त्वांसयाचे जनानि जननंयातुममवै मृडानी रुद्राणी शिवशिवभवानी तिजपतः ॥८॥ नाराधितासि विधिना विविधोपचारैः किंरुक्षचिन्तनपरैर्नकृतंवचो श्यामेत्वमेवयदि किञ्चन मय्यनाथे धत्सेकृपा मुचित मम्बपरंतवैव ॥९ सापत्सुमग्न स्मरणं त्वदीयंकरो-

सिदुर्गे करुणार्णवेशि ॥ नैतच्छठत्वंमम भावयेथाः क्षुत्तृषार्ताजननींस्म-
रन्ति ॥१०॥ जगदम्बविचित्र मंत्रकिंपरिपूर्णा करुणास्तिचैन्मयि ॥ अ-
पराधपरम्परावृतं नहिंमातासमुपेक्षते सुतम् ॥११॥ मत्समः पातकीनास्ति
पापघ्नीत्वत्समानाहि ॥ एवं ज्ञात्वामहा देवियथा योग्यंतथाकुरु ॥१२॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्कराचार्यविरचितम्
देव्यपराधक्षमापनस्तोत्रम् सम्पूर्णम् ॥ शुभम् ॥



पता—पण्डित शिवरामशर्म्मा बुकसेलर बनारस सिटी ।

भारतजीवन प्रेस, काशी मुद्रितम् ।